# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय ९६

तौ तथा युध्यमानौ तु समरे रामरावणौ ।
ददृशुः सर्वभूतानि विस्मितेनान्तरात्मना ॥ १ ॥

अर्दयन्तौ तु समरे तयोस्तौ स्यन्दनोत्तमौ ।
परस्परवधे युक्तौ घोररूपौ बभूवतुः ॥ २ ॥

मण्डलानि च वीथीश्च गतप्रत्यागतानि च ।
दर्शयन्तौ बहुविधां सूतौ सारथ्यजां गतिम् ॥ ३ ॥

अर्दयन्रावणं रामो राघवं चापि रावणः ।
गतिवेगं समापन्नौ प्रवर्तन निवर्तने ॥ ४ ॥

क्षिपतोः शरजालानि तयोस्तौ स्यन्दनोत्तमौ ।
चेरतुः संयुगमहीं सासारौ जलदाविव ॥ ५ ॥

दर्शयित्वा तदा तौ तु गतिं बहुविधां रणे ।
परस्परस्याभिमुखौ पुनरेव च तस्थतुः ॥ ६ ॥

धुरं धुरेण रथयोर्वक्त्रं वक्त्रेण वाजिनाम् ।
पताकाश्च पताकाभिः समेयुः स्थितयोस्तदा ॥ ७ ॥

रावणस्य ततो रामो धनुर्मुक्तैः शितैः शरैः ।
चतुर्भिश्चतुरो दीप्तान्हयान्प्रत्यपसर्पयत् ॥ ८ ॥

स क्रोधवशमापन्नो हयानामपसर्पणे ।
मुमोच निशितान्बाणान्राघवाय निशाचरः ॥ ९ ॥

सोऽतिविद्धो बलवता दशग्रीवेण राघवः ।
जगाम न विकारं च न चापि व्यथितोऽभवत् ॥ १० ॥

चिक्षेप च पुनर्बाणान्वज्रपातसमस्वनान् ।
सारथिं वज्रहस्तस्य समुद्दिश्य निशाचरः ॥ ११ ॥

मातलेस्तु महावेगाः शरीरे पतिताः शराः ।
न सूक्ष्ममपि संमोहं व्यथां वा प्रददुर्युधि ॥ १२ ॥

तया धर्षणया क्रोद्धो मातलेर्न तथात्मनः ।
चकार शरजालेन राघवो विमुखं रिपुम् ॥ १३ ॥

विंशतिं त्रिंशतं षष्टिं शतशोऽथ सहस्रशः ।
मुमोच राघवो वीरः सायकान्स्यन्दने रिपोः ॥ १४ ॥

गदानां मुसलानां च परिघाणां च निस्वनैः ।
शराणां पुङ्खवातैश्च क्षुभिताः सप्तसागराः ॥ १५ ॥

क्षुब्धानां सागराणां च पातालतलवासिनः ।
व्यथिताः पन्नगाः सर्वे दानवाश्च सहस्रशः ॥ १६ ॥

चकम्पे मेदिनी कृत्स्ना सशैलवनकानना ।
भास्करो निष्प्रभश्चाभून्न ववौ चापि मारुतः ॥ १७ ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
चिन्तामापेदिरे सर्वे सकिंनरमहोरगाः ॥ १८ ॥

स्वस्ति गोब्राह्मणेभ्योऽस्तु लोकास्तिष्ठन्तु शाश्वताः ।
जयतां राघवः सङ्ख्ये रावणं राक्षसेश्वरम् ॥ १९ ॥

ततः क्रुद्धो महाबाहू रघूणां कीर्तिवर्धनः ।
सन्धाय धनुषा रामः क्षुरमाशीविषोपमम् ।
रावणस्य शिरोऽच्छिन्दच्छ्रीमज्ज्वलितकुण्डलम् ॥ २० ॥

तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा ।
तस्यैव सदृशं चान्यद्रावणस्योत्थितं शिरः ॥ २१ ॥

तत्क्षिप्रं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा ।
द्वितीयं रावणशिरश्छिन्नं संयति सायकैः ॥ २२ ॥

छिन्नमात्रं च तच्छीर्षं पुनरन्यत्स्म दृश्यते ।
तदप्यशनिसङ्काशैश्छिन्नं रामेण सायकैः ॥ २३ ॥

एवमेव शतं छिन्नं शिरसां तुल्यवर्चसाम् ।
न चैव रावणस्यान्तो दृश्यते जीवितक्षये ॥ २४ ॥

ततः सर्वास्त्रविद्वीरः कौसल्यानन्दिवर्धनः ।
मार्गणैर्बहुभिर्युक्तश्चिन्तयामास राघवः ॥ २५ ॥

मारीचो निहतो यैस्तु खरो यैस्तु सुदूषणः ।
क्रञ्चारण्ये विराधस्तु कबन्धो दण्डका वने ॥ २६ ॥

त इमे सायकाः सर्वे युद्धे प्रत्ययिका मम ।
किं नु तत्कारणं येन रावणे मन्दतेजसः ॥ २७ ॥

इति चिन्तापरश्चासीदप्रमत्तश्च संयुगे ।
ववर्ष शरवर्षाणि राघवो रावणोरसि ॥ २८ ॥

रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः ।
गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ॥ २९ ॥

देवदानवयक्षाणां पिशाचोरगरक्षसाम् ।
पश्यतां तन्महद्युद्धं सर्वरात्रमवर्तत ॥ ३० ॥

नैव रत्रिं न दिवसं न मुहूर्तं न चक्षणम् ।
रामरावणयोर्युद्धं विराममुपगच्छति ॥ ३१ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com